## अध्याय :- ४७ Chapter-47

नारद उवाच ।।[1]

ततो महात्म्य तीर्थस्य ~~कृष्णकक्ष~~ रक्षणाय पुनर्जय[2] ।।
समाराद्य यथा देव्यः स्थापितास्तच्छृणुष्वभोः[3] ।। १

यथात्मा सर्वभूतेषु व्यापकः परमेश्वरः ।।
तथैव प्रकृतिर्नित्या व्यापका परमेश्वरी ।। २

शक्ति प्रसादादाप्नोति वीर्यं सर्वाश्चैव संपदः ।।
ईश्वरी सर्वभूतेषु सा चैवं पार्थ संस्थिता ।। ३

बुद्धिह्रीपुष्टिलज्जेति तुष्टिः शांतिः क्षमा स्पृहा ।।
श्रद्धा च चेतना शक्तिर्मंत्रोत्साहप्रभूद्भवा ।। ४

इयमेव च बंधाय मोक्षायेयं च सर्वदा ।।
एनामाराध्य चैश्वर्यमिन्द्राद्याः समवाप्नुयुः ।। ५

ये च शक्तिं न मन्यंते तिरस्कुर्वंति चाधमाः ।।
योगीन्द्रा अपि ते व्यक्तं भ्रश्यंति काशिजा यथा ।। ६

वाराणस्यां किल पुरा सिद्धयोगीश्वराः पुनः ।।
अवमन्य च ते शक्तिं[4] पुनर्भ्रंशमुपागताः ।। ७

---

१ अ. श्री नारद ।। ब. श्री नारद उवा० ।।
२ ब. पुनर्जयं
३ ब. 'मे' पाठः ।
४ ब. शक्तिः

तस्मात्सदा देहिनेयं शक्तिः पूज्यैव नित्यदा ।।
तुष्टा ददाति सा कामान्रुष्टा[१] संहरते क्षणात् ।। ८

परमा प्रकृतिः सा च बहुभेदैर्व्यवस्थिता ।।
तासां मध्ये महादेव्यो ह्यत्र संस्थापिताः शृणु ।। ९

चतस्रस्तु महाशक्तयश्चतुर्दिक्षु व्यवस्थिताः ।।
सिद्धाम्बिका तु पूर्वस्यां स्थापिता सा गुहेन च ।। १०

जगदादौ मूल प्रकृतेरुत्पन्ना सा प्रकीर्त्यते ।।
आराधिता यतः सिद्धिस्तस्मात्सिद्धाम्बिका च सा ।। ११

दक्षिणस्यां तथा तारा संस्थिता स्थापिता मया ।।
तारणार्थाय देवानां यस्मात्कूर्मं समाश्रिता[२] ।। १२

मयाविष्टः समुज्जह्रे वेदान्कूर्मो जगद्गुरुः ।।
अनयाविष्ट देहश्च बुधो बौद्धान्हनिष्यति ।। १३

कोटिशो वेदमार्गस्य ध्वंसकान्पाप कर्मिणः[३] ।।
इयं मया समाराध्य समानीता गिरेः सुता[४] ।। १४

---

१ अ. कामानरुष्टा
२ ब. समाश्रीताः
३ ब. कर्मभिः
४ अ. ब. सितात्

कोटि संख्याभिरत्युग्र देवीभिः संवृता च सा ।।
दक्षिणां दिशमाश्रित्य संस्थिता मम गौरवात् ।। १५

पश्चिमायां तथा देवी संस्थिता भास्करा शुभा[1] ।।
यमाविष्टानि भासंते भास्कर प्रमुखानि च ।। १६

बिंबानि सर्वताराणां गच्छन्त्यायांति च द्रुतम ।।
सैषा महाबला शक्ति भास्करा कुरु[2] नन्दन ।। १७

मयाराध्य समानीता कटाहादत्र संस्थिता ।।
कोटि कोटि वृता नित्यं त्रायते पश्चिमां दिशम् ।। १८

उत्तरस्यां तथा देवी संस्थिता योगनंदिनी ।।
परमप्रकृतेर्देहात्पूर्वं निःसृतया यया ।। १९

दष्टया दष्टा निर्मलया योगमापुश्चतुः सनाः ।।
योगीश्वरी च सा देवी सनकाद्यैः सुतोषिता ।। २०

सैव[3] चांडकटाहान्मे समाराध्यात्र प्रापिता ।।
योगिनीभिः परिवृता संस्थिता चोतरां दिशम् ।। २१

---

१ अ. शुभा
२ अ. कुल
३ ब. सा

एवमेता महाशक्त्यश्चैतस्त्रः संस्थिताः सदा ।।
पूजिताः कामदा नित्यं रुष्टाः संहरणक्षमाः ।। २२

ततश्च नव मे दुर्गाः समानीताः शृणुष्व ताः ।। २३

त्रिपुरानाम परमा देवी स्थाणुर्यया पुरा ।।
आविष्टस्त्रिपुरं निन्ये भस्मत्वं जगदीश्वरः ।। २४

त्रिपुरेति ततस्त्वां तु प्रोक्तवान्भगवान्हरः ।।
तुष्टाव च स्वयं तस्मात्पूज्या सा जगतामपि ।। २५

सा चाराध्य समानीता मयाम्मरेश्वर पर्वतात् ।।
भक्तानां कामदा सास्ति भट्टादित्य समीपतः ।। २६

अपरा चापि कोलंबा महाशक्तिः सनातनी ।।
कोलरूपी ययाविष्टः केशवश्चोज्जहार गाम् ।। २७

तस्मात्सा विष्णुना चोक्ता कोलंबेति स्तुतार्चिता ।।
सा च देवी मया पार्थ भक्तियोगेन् तोषिता[२] ।। २८

---

*१ म. श्लोक २२-२३ पर्यन्तं त्रुटितं (एवमेता..... शृणुष्वताः।।)
२ ब. तोषिते

वाराहगिरि संस्था मां समानीता च साब्रवीत् ।।
यत्राहं नारद सदा तिष्ठामि कृपयार्थिनाम् ।। २९

तत्र कूपेन संस्थेयं रुद्राणी संस्थितेन वै ।।
तं हि कूपं विना मह्यं न रतिर्जायते क्वचित् ।। ३०

तस्माद्भवान्कूप वरं स्वयमत्र खन द्विज ।।
एवमुक्ते पार्थ देव्या दर्भ मूलेन मे तदा ।। ३१

कूपोऽखनि यत्र साक्षाद्रुद्राणी कूप आव भौ ।।
ततो मया तत्र देवाः स्नात्वा जप्त्वा च तर्पिताः ।। ३२

पूजिता च ततो देवी ~~प्रणतं मां ततोऽब्रवीत्~~ ++
कोलंबा जगदीश्वरी ।।
परितुष्टा तदा देवी प्रणतं मां ततोऽब्रवीत् ।। ३३

सदात्र चाहं स्थास्यामि प्रसादं प्रापिता त्वया ।।
ये च कूपेत्र संस्नात्वा माघाष्टम्यां विशेषतः ।। ३४

पूजयिष्यंति मां मर्त्यास्तेषां छेत्स्यामि दुष्कृतम् ।।
सर्व तीर्थमयो यश्चैव सर्व तु कवने स्थितः ।। ३५

---

१ अ. 'वरः'

२ ब. देवा

* अ. पूजिता च ततो देवी प्रणतं मा ततोब्रवीत् ।।
परितुष्टा तया देवी कोलंबा जगदीश्वरी ।।
(श्लोक पंकित व्युत्क्रमे)

मेरोः समीपे रुद्राण्याः कूप एष स एव च ।। ३६

प्रयागादपि गंगाया गयामाश्रुव विशेषतः ।।
कूपेस्मिन्नधिकं स्नानं मया नारद कीर्तितम् ।। ३७

तदहं तव वाक्येन संस्थितात्र तपोधन ।।
गुहनाथ[1] सरः पुण्यं पालयिष्याम्य तंद्रिता ।। ३८

कुमारेशं पूजयित्वा पूजयिष्यंति ये च माम् ।।
देवीभिः षष्टि कोटिभिर्युता तेषामभीष्टदा ।। ३९

नारद उवाच ।।[2]
*३ इत्युक्तोऽहं पार्श्व देव्या तदानीं प्रीयमाण्या ।।
प्रत्यब्रुवं प्रमुदितः कौलंबां विश्वमातरम् ।। ४०

अत्रास्य माता त्वं देवि गुप्तक्षेत्रस्य कारणम् ।।
तीर्थयात्रा वृथा तेषां नार्च्चयंतीह त्वां च ये ।। ४१

इदं च यत्सरः पुण्यं त्वन्नाम्ना ख्यातिमेष्यति ।।
ईश्वरी सरसोऽस्य त्वं तीर्थस्यास्य तथेश्वरी ।। ४२

---

१ अ. गुहनाय ब. गुहनाथ
२ अ. ब. हस्तप्रतिषु इत्ययं पाठः नास्ति ।
* ३ इत्युक्तो . . . . .माणया ।।
प्रत्य.........मातरम् ।।४० ।।
ब. प्रतौ इत्ययं पाठः नास्ति ।

एवं दीर्घं तपस्तप्त्वा स्थापिता मयका शुभा[1] ।।
महादुर्गा नरैस्तस्मात्पूज्येयं सततं बुधैः ।। ४३

तृतीया[2] च दिशि तस्यां स्थितां संस्थापिता मया ।।
गुहेन च कपालेश्याः प्रभावोस्याः पुरेरितः[3] ।। ४४

धन्यास्ते ये प्रपश्यंति नित्यमेनां नरोत्तमाः ।।
कपालेश्वरमभ्यर्च्य विश्वशक्तिरियं यतः[4]।। ४५

एवमेतास्तिस्त्रो दुर्गाः पूर्वस्यां दिशि संस्थिताः ।।
पश्चिमायां प्रवक्ष्यामि तिस्त्रो दुर्गा महोत्तमाः ।। ४६

सुवर्णाक्षी तु या देवी ब्रह्मांड परिपालिनी ।।
सा मयात्र समाराध्य तीर्थे देवी निवेशिता ।। ४७

ये चैनां प्रणमिष्यंति पूजयिष्यंति भक्तितः ।।
त्रयस्त्रिंशद्भिः कोटीभिर्दिभिः पूजिता च तैः ।। ४८

अपरा च महादुर्गा चर्चिता चेति संस्थिता[5] ।।
रसातल तलात्तत्र मयानीता सुभक्तितः ।। ४९

---

१ अ. शुभा
२ ब. तृतीये
३ ब. पुरेतितः
४ अ. ततः ।।
५ ब. ताः

इयमर्च्या च चिंत्या च वीरत्वं रामभीप्सुभिः ।।
बहुभिर्देव दैतैयैर्ददौ तेभ्यश्च वीरताम् ।। ५०

इयमेव महादुर्गा शूद्रकं वीरसत्तमम् ।।
चौरैर्बद्धं कलौ‿चाग्रे मोक्षयिष्यति[1] विक्रमात् ।। ५१

ततस्त्वेतां स चाराध्य वीरेंद्रत्वमवाप्स्यति ।।
निहनिष्यति चाक्रम्य कालसेनमुखान्रिपून् ।। ५२

तस्मादियं समाराध्या वीर्यकामैर्नरैः सदा ।।
चर्चिता या महादुर्गा पश्चिमायां दिशि स्थिता ।। ५३

तथा त्रैलोक्यविजया श्री तृतीयस्यां दिशि स्थिता ।।
यामाराध्यं जयं प्राप्तस्त्रिलोक्यां रोहिणी पतिः ।। ५४

एवमेताः पश्चिमायामुत्तरस्यामतः शृणु ।।
तिस्त्रो देव्यश्चोत्तरस्यामेक वीरामुखाः स्थिता ।। ५५

एकवीरेति[2] या देवी साक्षात्सा शिवपूजिता ।।
ययाविष्टो जगत्सर्वं संहरत्येष भूतराट् ।। ५६

---

१ अ. ......यंति
२ ब. एकवीरोति

वीर्येणाधिक वीरायाः कृत्वा लोकौ भस्मसात् ।।
युगैकादश पूर्णत्वे विलक्षा भूत्स भस्मनि ।। ५७

एवं विधा त्वेकवीरा शक्तिरेषा सनातनी ।।
पूजिताराधिता च चैव [1]सर्वाभीप्सितदा नृणाम् ।। ५८

ब्रह्मलोकात्समानीता मयाराध्यात्र भारत ।।
नाम कीर्तनमप्यस्या दुष्टानां घातनं विदुः ।। ५९

द्वितीया हरसिद्धयाख्या देवी दुर्गा महाबला ।।
शीकोत्तरात्समाराध्य मयानीतात्र पांडव ।। ६०

यदा शीकोत्तरस्थेन पार्वत्या प्रार्थितेन च ।।
रुद्रेण ~~कार्मिकी~~ डाकिनी मंत्रः[2] प्रोक्तो देव्याः कृपालुना ।। ६१

तदा मंत्र[3]प्रभाविण मोहिता गिरिजा सती ।।
तमेवाक्रम्य मांसं च शोणितं च भवं पपौ ।। ६२

ततो रुद्रशरीरात्तु विनिष्क्रांतार्तिनाशिनी ।।
हरसिद्धिर्महादुर्गा महामंत्र विशारदा ।। ६३

---

१ ब. सा सर्वा

२ ब. मंत्र

३ अ. प्रभावेन

सा सहस्त्रभुजा[1] देवी समाक्रम्याभिपीडय च ।।
मोक्षयामास गिरिशमशापवत तां तथा ।। ६४

ततः प्रभृति सा लोके हरसिद्धिः प्रकीर्त्यते ।।
देवीनां ष्ष्टिकोटिभिरावृता पूज्यते सुरैः ।। ६५

एतद्मारात्य सुग्रीवप्रमुखा दोष नाशिनीम्[2]।।
अभूवनतुलमहावीर्या डाकिनी संघ नाशनाः ।। ६६

तस्मादेतां पूजयेतु मनोवाक्काय कर्मभिः ।।
डाकिन्याद्या न सर्पंति हरसिद्धेरनंतरम् ।। ६७

तृतीयैशानकोणस्था चंडिका नवमी स्थिता ।।
वागीशोऽपि लभेत्पारं नैव यस्याः प्रवर्णनि ।। ६८

या पुरा पार्वती देहाद्विनीः सृत्य महासुरौ[3] ।।
चंदमुंडौ निहत्यैव भक्षयामास क्रोधतः ।। ६९

अक्षौहिणी[4]शतं त्वेकं चंडमुंडौ च तावुभौ।।
नापूर्यतैकग्रासोऽस्याः क्लिश्या यात्त्वियं हि सा ।। ७०

---

१ अ. भुजां
२ नाशकाः अ. ब. पाठः ।
३ ब. महासुरो
४ अ. ह अक्षौहणी.....

इयमेवांधकानां च तृषिता शोणितं पुनः ।।
पपौ ततो निजग्राहा चांधकं भगवान्भवः ।। ७१

इयं च रक्तबीजानां कृत्वा पानं च रक्तजम् ।।
अर्पयामास तं देव्याश्चामुण्डापीत शोणितम् ।। ७२

एषा तृप्यति भक्तानां प्रणामेनापि भारत ।।
अर्बुदानां च कोटीभिर्दैत्यानां पापकर्मिणाम् ।। ७३

कुण्डं चास्या मया देव्याः पुण्यं निष्पादितं शुभम् ।।
यत्र वै स्पर्शमात्रेण सर्वतीर्थफलं लभेत् ।। ७४

हरसिद्धिर्देव सिद्धिधर्मसिद्धिश्च भारत ।। ७५

यश्च पूजयते देवीं स्वल्पेन बहुनापि वा ।।
कात्यायनी कोटिशतैर्वृता[1] तस्य विभूतिदा ।। ७६

एवमेता महादुर्गा नव तीर्थेऽत्र संस्थिताः[2] ।।
चतस्रश्चापि दिग्देव्यो नित्यमर्च्याः शुभेप्सुभिः ।। ७७

---

१ अ. कोटिशतवृता
२ ब. ता

[1]आश्विनस्य च मासस्य नवरात्रे विशेषतः ।।
उपोष्य चैक भक्तैर्वा देवीस्त्वेताः ~~प्रपूजयेत्~~ ++ प्रपूजयेत् ।। ७८

बलिपूपकनैवेद्यैस्तर्पणै: धूपगंधादिभिः ।।
तस्य रक्षां चरंत्येता रथ्यासु त्रिकचत्वरे ।। ७९

भूतप्रेतपिशाचाद्या नोपकुर्युः प्रपीडनम् ।।
आपदो विद्रवंत्याशु योगिन्यो नंदयंति तम् ।। ८०

पुत्रार्थी लभते पुत्रान्धनार्थी धनमाप्नुयात् ।।
रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।। ८१

आसां यः कुरुते भक्तिं[2] नरो नारी च श्रद्धया ।।
सर्वान्कामान्वाप्नोति ~~यच्चिंत~~ यांश्चिंतयति चेतसि ।। ८२

कामगव्य इमा देव्यश्चिन्तामणिनि भास्तथा ।।
कल्पवल्लयोऽथ भक्तानां प्रतिच्छन्दोऽत्र नैव हि ।। ८३

तथात्र भूतमाताऽस्ति हरसिद्धेस्तु दक्षिणे ।।
तस्या माहात्म्यमतुलं संक्षेपात्प्रब्रवीमि ते ।। ८४

---

१ अ. ब. अश्विवन
२ ब. भक्ति

पूर्वं किल गुहो विद्वान्पुण्ये सारस्वते तटे ।।
भूतप्रेतपिशाचानामाधिराज्ये भ्यषिच्यत ।। ८५

स च सर्वाणि भूतानि मर्यादायाम धारयत् ।।
एतदन्नं प्रदायैव कृपया भगवान्गुहः ।। ८६

यदमंत्रहुतं[1] किंचिद्वेद बाह्यं च ब यत्कृतम् ।।
अश्रद्धया च क्रोधेन तद्वस्तुष्ट्यै भविष्यति ।। ८७

ततस्त्वनेन भोगेन तानि नंदंति कृत्स्नशः ।।
ततः केनापि कालेन श्रद्धया श्रद्धया कृतम् ।। ८८

पुण्यं तान्येव भूतानि ग्रसंत्याक्रम्य देवताः ।।
ततो देवाः क्षुधार्तास्ते गुहायैतभ्यवेदयन् ।। ८९

स वै तदाकर्ण्य क्रुद्धो गुहः काल इवाभवत् ।।
तस्य क्रुद्धस्य भ्रूपद्ममध्यात्काचिद्विनिर्गता ।। ९०

ज्वालामाला सुदुर्दर्शा नारी द्वादशलोचना ।।
सा च प्रणम्य तं प्राह तव शक्तिरहं प्रभो ।।
शिघ्रमादिश[2] मां कृत्ये किं करोमि तवेप्सितम् ।। ९१

---

१ अ. ब. यदा

२ अ. ब. शीघ्रमादिश

स्कन्द उवाच ।।[1]

एतैर्भूतगणैः[2] पापैरुल्लंघ्य मम शासनम् ।। १२

मनुष्यदत्तं सकलं भुज्यते स्वेच्छयाधमैः ।।
शीघ्रमेतानि त्वं तस्मान्मर्यादायामुपानय ।। १३

एतास्त्वानुव्रजिष्यंति देव्यं कोटिशतं शुभे[3] ।।
ततस्तथेति सा चोक्ता देवीभिः संवृता तदा ।। १४

मयूरं समुपास्थाय गुहशक्तिः समागता ।।
सरोजवनमासाद्य[4] भूतसधान ऽपश्यत[5] ।। १५

जघान च समासाद्य देवी नानाविधायुधैः ।।
ततः प्रेतपिशाचाद्या हन्यमाना महारणे ।। १६

प्रसादयंति तां देवीं नानावेषैः सुदीनवत् ।।
केचिद्ब्राह्मण ऽवेषैश्च तापसानां तथोक्तिभिः ।। १७

नृत्यंति देवि पद्मांक्षि प्रसीदेति पुनः पुनः ।।
ततः प्रसन्ना सा देवी विप्रतां स्वेच्छया ऽह तान् ।। १८

---

१ ब. स्कंद उ० ।।
२ ब. भूतिभूतिर्गणैः
३ अ. शुभे
४ अ. शिरोजुवनमासाद्य । ब. शिरोभुवनमासाद्य
५ ब. पश्यते

स्त्राहि नरत्वं भूतमाता भवेश्वरि ।।
मर्यादां नैव व्यक्ष्यामो वयं स्कन्द विनिर्मितानि ।। ९९

ये चैवं त्वां तोषयन्ति तेषां देहि वरान्सदा ।। १००

श्रीदेव्युवाच ।।
वैशाखे दर्शदिवसे ये चैवं श्री तोषयंति माम् ।।
[1]अरिष्टा भरणीः पुष्पैर्दधि भक्तैश्च पूजनैः ।।
तेषां सर्वोपसर्गा वै यास्यंति विलयं स्फुटम् ।। १०१

एवं दत्वा वरं देवी मुमुदे भूत संवृता ।।
एवं प्रभावा सा देवी मयानीतात्र भारत ।। १०२

य एनां प्रणमेन्मर्त्यः सर्वारिष्टैर्विमुच्यते ।। १०३

एवं प्रभावा परिकीर्तिता मया समासतस्तीर्थवरेऽत्र देव्यः ।।
चतुर्दशैवार्जुन पूजिता[2] याश्चतुर्दशस्थानवरैर्नुमुख्यैः ।। १०४

*[3] इति श्री स्कांदे..... श्री देव्याख्यानवर्णनं नाम सप्त चत्वारिंशत्तमोऽध्यायः।।४७।।

---

१ अ. ब. अरिष्टा भरणाः
२ ब. पूजया
*३ अ. इति श्री स्कंद पुराणे श्रीदेव्याख्यानं ।।
ब. इति श्री स्कंदपुराणे कुमारिकाखंडे देव्योपाख्यानं सप्तचत्वारिंशोऽध्यायः।।